पचिं वचिं विचिरिचिरञ्जिपृच्छतीन्
निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् ।
त्यजिं यजिं युजिरुजिसञ्जिमज्जतीन्
भुजिं स्वञ्जिं सृजिमृजी विद्ध्यनिट्स्वरान् ॥

पक्ता । वक्ता । विवेक्ता । रेक्ता । रङ्क्ता । प्रष्टा । निर्णेक्ता । सेक्ता । मोक्ता । भक्ता । भङ्क्ता । भ्रष्टा, भर्ष्टा । त्यक्ता । यष्टा । योक्ता । रोक्ता । सङ्क्ता । मङ्क्ता । भोक्ता । परिष्वक्ता । स्रष्टा । मार्ष्टा । मृजिरयमूदित् पठ्यते, ततोऽस्य विकल्पेन [1]इटा भवितव्यम् । मार्ष्टा, मर्जिता[2] इति, अमागमोऽप्यस्य न दृश्यते ? तदिह पाठस्य प्रयोजनं चिन्त्यम् । केचिदस्य स्थाने विजिं पठन्ति, सृजिं विजिं विद्ध्यनिट्स्वरान् इति । निजादिषु यो विजिरसौ अनिडिष्यते । तथा च [3]तन्त्रान्तरे निजिविजिष्वञ्जिवर्जम् इत्युक्तम् । एकाच इति किम् ? अवधीत् । वृद्धिनिवृत्त्यर्थमदन्तो[4] वधिरुपदिश्यते । उपदेशग्रहणं किम् ? इह च यथा स्यात्, लविष्यति, पचिष्यति । इह च मा भूत्, कर्ता कटान्, कर्तुम् इति ॥

## श्र्युकः किति । (११/२३८१)

श्रि इत्येतस्य[5] उगन्तानां च किति प्रत्यये परतः इडागमो न भवति । श्रि – श्रित्वा । श्रितः । श्रितवान् । उगन्तानां च–युत्वा । युतः । युतवान् । लूत्वा । लूनः । लूनवान्[6] । [7]वृत्वा । वृतः । वृतवान् । तीर्त्वा । तीर्णः । तीर्णवान् । श्र्युकः इति किम् ? [8]विदितः । किति इति किम् ? श्रयिता । श्रयितुम् । श्रयितव्यम् ।

केचिदत्र द्विककारनिर्देशेन गकारप्रश्लेषं वर्णयन्ति, भूष्णुः इत्येवं यथा स्यात् । सौत्रत्वाच्च निर्देशस्य श्र्युकः किति इत्यत्र चर्त्वस्य असिद्धत्वमनाश्रित्य रोरुत्वं न कृतम् विसर्जनीयश्च कृतः इति । 'ग्लाजिस्थश्च क्स्नुः' (३. २. १३९/३११९) इत्यत्र स्था आ इत्याकारप्रश्लेषेण स्थास्नोः सिद्धत्वान्न किंचिदेतत् ।

उपदेशे इत्येव, तीर्ण इत्यत्रापि[9] यथा स्यात् । इत्वे हि कृते रपरत्वे च न स्यात् । मा भूदेवम् । 'इट् सनि वा' (७. २. ४१/२६२५) इति विकल्पे विहिते 'यस्य विभाषा' (७. २. १५/३०२५) इति निष्ठायां प्रतिषेधो भविष्यति ? कस्य पुनः सा विभाषा ? ॠतः । यद्येवम् इत्वे[10] हि कृते नायमृकारान्तो भविष्यति ? स्थानिवद्भावाद् भविष्यति । अनल्विधौ स्थानिवद्भावः, अल्विधिश्चायम् ? तस्मादनुवर्तयितव्यम् [11]उपदेशे इति । तथा च सति जागरितः, जागरितवान् इत्यत्रापि[12] प्राप्नोति, तदर्थम् एकाचः इत्यनुवर्तयितव्यम् । ऊर्णोतेस्तु –

वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

प्रोर्णुतः[13] । प्रोर्णुतवान्[14] ॥

---

1. इटा नास्ति ब. 2. सम्मार्जिता इत्यधिकम् क. 3. ग्रन्थान्तरे ब. फ. ह. 4. अपि इत्यधिकम् ह. 5. इत्येतस्य धातोः इत्यधिकम् इ. 6. पूतः पूतवान् इत्यधिकम् क. 7. वृत्वा, वृतवान् नास्ति ब. 8. विदितवान् विदित्वा इत्यधिकम् क. इ. 9. प्रतिषेधो इत्यधिकम् इ. 10. रपरत्वे इत्यधिकम क. 11. उपदेशग्रहणम इत्यधिकम् ब. 12. प्रतिषेधः इत्यधिकम् क. 13. इति इत्यधिकम् ब. क. 14. इति इत्यधिकम् ई, ऊर्णुतः ऊर्णुतवान्